"प्रतिज्ञां मम राजेन्द्र ! निर्वर्त्तयितुमर्हसि ।
पुत्त्रयोरुभयोरेव प्रीतिं समुपलप्स्यसे ॥")

तत्पर्य्यायः । मुत् २ प्रमदः ३ हर्षः ४ प्रमोदः ५ आमोदः ६ सम्मदः ७ आनन्दथुः ८ आनन्दः ९ शर्म्म १० सातम् ११ सुखम् १२ । इत्यमरः । १ । ४ । २४ ॥ केचित्तु । मुदादिषट्कं प्रीतौ । आनन्दथ्वादिषट्कं सुखे इत्याहुः इति भरतः ॥ इष्टदर्शनजन्यं सुखम् । इति मोक्षधर्म्मे नीलकण्ठः ॥ कामपत्नी । इति मेदिनी । ते, ३४ ॥ सा पुरा अनङ्गवती वेश्या आसीत् विभूतिद्वादशीव्रतं कृत्वा रत्याः सपत्नी जाता । यथा,—

"वेश्यानङ्गवती नाम विभूतिद्वादशीव्रतम् ।
समाप्य माघमासस्य द्वादश्यां लवणाचलम् ॥
निवेदयन्ती गुरवे शय्याञ्चोपस्करान्विताम् ।
अलंकृत्य हृषीकेशं सौवर्णामरपादपम् ॥
सा चानङ्गवती वेश्या कामदेवस्य साम्प्रतम् ।
पत्नी सपत्नी संजाता रत्याः प्रीतिरिति श्रुता ॥"
इति मात्स्ये ९२ अध्यायः ॥

विष्कम्भादिसप्तविंशतियोगान्तर्गतद्वितीययोगः । तत्र जातफलम् ।

"प्रसूतिकाले यदि प्रीतियोगो
नरो ह्यरोगः सुखवान् विनोदी ।
रक्तानुरक्तो विदुषां प्रपन्नः
संप्रार्थितो यच्छति वित्तमेव ॥"
इति कोष्ठीप्रदीपः ॥

प्रेम । इति मेदिनी । ते, ३४ ॥

प्रीतिजुषा, स्त्री, (प्रीतिं जुषते सेवते इति । जुष् सेवने + कः । टाप्) अनिरुद्धपत्नी । उषा । इति शब्दरत्नावली ॥ (प्रीतिभाजि, त्रि ॥)

प्रीतिदः, पुं, (प्रीतिं ददातीति । दा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) भण्डः । भाँड़ इति भाषा । तत्पर्य्यायः । वासन्तिकः २ केलिकिलः ३ वैहासिकः ४ विदूषकः ५ प्रहासी ६ । इति हेमचन्द्रः ॥ हर्षसुखप्रेमदातरि, त्रि ॥

प्रीतिदत्तं, क्ली, (प्रीत्या दत्तमिति ।) प्रीत्या दत्तवस्तु । यथा, मिताक्षरायाम् ।

"प्रीत्या दत्तन्तु यत् किञ्चित् श्वश्र्वा वा श्वशुरेण वा ।
पादवन्दनिकञ्चैव प्रीतिदत्तं तदुच्यते ॥"

भावे क्तप्रत्यये प्रीतिदानञ्च ॥

प्रीतिभोज्यं, त्रि, (प्रीत्या भोज्यम् ।) प्रीत्या भक्षणीयमन्नादि । यथा,—

"अन्नानि प्रीतिभोज्यानि आपद्भोज्यानि वा पुनः ।
न च संप्रीयसे राजन्न चैवापद्गता वयम् ॥"
इति महाभारते । ५ । ९१ । २५ ॥

प्रु, ङ सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-अनिट् ।) रेफयुक्तः । ङ, प्रवते । इति दुर्गादासः ॥

प्रुष, उ दाहे । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् । उदित्वात् क्त्वावेट् ।) उ, प्रोषित्वा प्रुष्ट्वा । दाहे भस्मीकरणे । इति दुर्गादासः ॥

प्रुष, श सेके । पूर्त्तौ । स्नेहे । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सेके पूर्त्तौ च सक०-स्नेहे अक०-सेट् ।) श, प्रुष्णाति पुप्रोष । सेकस्थाने मोचनमिति धातुप्रदीपमञ्जर्य्यौ । इति दुर्गादासः ॥

प्रुष्टः, त्रि, (प्रुष् दाहे + क्तः ।) दग्धः । इत्यमरः । ३।१।९६ ॥ (यथा, राजतरङ्गिण्याम् ।६।१४४ ।

"सा यागज्वलने राजललना प्रीतसर्पिषि ।
पूर्णाहुत्या समं साध्वी जुहाव सहसा तनुम् ।
उपर्य्यस्या निरस्तासोः प्रुष्टाः कुसुमदृष्टयः ॥")

प्रुष्वः, पुं, (प्रुष्णाति स्निह्यति पिपर्त्ति वेति । प्रुष + "अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन् ।" उणा० १ । १५१ । इति क्वन् टाप् ।) ऋतुः । (प्रोषति दहतीति ।) दिवाकरः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

प्रुष्वा, स्त्री, (प्रुष्णाति सिञ्चतीति । प्रुष + "अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन् ।" उणा० १ । १५१ । इति क्वन् । टाप् ।) जलबिन्दुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, शतपथब्राह्मणे ।५।३।४।१६ । "अथ प्रुष्वा गृह्णाति ॥")

प्रेक्षणं, क्ली, (प्रेक्षते पश्यत्यनेनेति । प्र + ईक्ष + करणे ल्युट् ।) चक्षुः । इति शब्दरत्नावली ॥ (भावे ल्युट् ।) दर्शनम् । यथा, रसमञ्जरी ।

"सञ्चारो रतिमन्दिरावधि पदन्यासावधि
प्रेक्षणम् ॥"

प्रेक्षणकूटः, पुं, (प्रेक्षणस्य कूटः ।) चक्षुर्गोलकः । यथा, पाण्डुरोगपूर्व्वरूपे माधवकरः ।

"त्वक्पोटनष्ठीवनगात्रसाद-
मृद्भक्षणप्रेक्षणकूटशोथाः ॥"

प्रेक्षा, स्त्री (प्रकर्षेण ईक्षते ययेति । प्र + ईक्ष + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः । टाप् ।) प्रज्ञा । (यथा, महाभारते ।१।१३६।७ ।

"सा तर्क्के सर्व्वमाचष्ट यवक्रीभाषितं शुभा ।
प्रमुक्तञ्च यवक्रीतं प्रेक्षापूर्व्वं तथात्मना ।")

नृत्यक्षणम् । इत्यमरः । ३ । ३ । २१२ ॥ (यथा, मनौ । ९ । ८४ ।

"प्रतिषिद्धापि चेद्या तु मद्यमभ्युदयेष्वपि ।
प्रेक्षासमाजं गच्छेद्वा सा दण्ड्या कृष्णलानि
षट् ॥"

प्र + ईक्ष + भावे अः । टाप् ।) ईक्षणम् । इति भरतः ॥ (यथा, भागवते । ३ । १६ । ७ ।

"यत्सेवया चरणपद्मपवित्ररेणुं
सद्यःक्षताखिलमलं प्रतिलब्धशीलम् ।
न श्रीर्विरक्तमपि मां विजहाति यस्याः
प्रेक्षालवार्थमितरे नियमान् वहन्ति ॥")

शाखा । इति शब्दरत्नावली ॥ (शोभा । यथा, भागवते । ३ । ८ । २५ ।

"प्रेक्षां क्षिपन्तं हरितोपलाद्रेः
सन्ध्याभ्रनीवेरुरुरुक्ममूर्द्ध्नः ।
रत्नोदधारौषधिसौमनस्य-
वनस्रजो वेणुभुजाङ्घ्रिपाङ्घ्रेः ॥"

"हरितोपलाद्रेर्मरकतशिलामयपर्व्वतस्य प्रेक्षां शोभां क्षिपन्तं स्वलावण्यातिशयेन तिरस्कुर्व्वन्तम् ॥" इति तट्टीकायां स्वामी ॥)

प्रेङ्खन् [त्] त्रि, (प्र + इखि गतौ + शतृ ।) चलनविशिष्टः । संचलितविशिष्टः । यथा,—

"ज्याकृष्टिबद्धखटकामुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसंवलितोऽम्बिकायाः ॥"
इत्याद्यमरुशतके । १ ॥

प्रेङ्खा, स्त्री, (प्रेङ्खते गम्यतेऽनयेति । प्र + इखि गतौ + करणे घञ् । टाप् ।) दोला । इत्यमरः । २ । ८ । ५३ ॥ (यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये । "नाग्निगोगुरुब्राह्मण-प्रेङ्खाद्यम्पत्यन्तरेणाभियायात् ॥"*॥) पर्य्यटनम् । अश्वगतिः । संवेशनान्तरम् । इति मेदिनी । खे, ३ ॥ नृत्यम् । इति धरणिः ॥

प्रेङ्खितं, त्रि, (प्र + इखि गतौ + क्तः ।) कम्पितम् । इत्यमरः । ३ । १ । ८७ ॥

प्रेङ्खोल, तृ क चापल्ये । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-अक०-सेट् ।) अन्तःस्थतृतीयोपधः । अपिप्रेङ्खोलत् । चापल्यं चञ्चलीभावः । इति दुर्गादासः ॥

प्रेङ्खोलनं, क्ली, (प्रेङ्खोल्यते चल्यतेऽनेनेति । प्रेङ्खोल + करणे ल्युट् ।) दोला । इति हेमचन्द्रः ॥ (भावे ल्युट् । कम्पनम् । यथा, सुश्रुते निदानस्थाने ८ अध्याये ।"विरेचनप्रेङ्खोलनाजीर्णगर्भशातनप्रभृतिभिर्विशेषैर्बन्धनान्मुच्यते गर्भः फलमिव वृन्तबन्धनादभिघातविशेषैः ॥")

प्रेङ्खोलितं, त्रि, (प्रेङ्खोल + क्तः ।) दोलितम् । तत्पर्य्यायः । तरलितम् २ लुलितम् ३ प्रेङ्खितम् ४ धुतम् ५ चलितम् ६ कम्पितम् ७ धूतम् ८ वेल्लितम् ९ आन्दोलितम् १० । इति हेमचन्द्रः ॥

प्रेतः, पुं, (प्र + इ गतौ + क्तः ।) नरकस्थप्राणी । इत्यमरः ।३ । ३ । ५९ ॥ भूतभेदः । मृते, त्रि । इति मेदिनी । ते, ३७ ॥ (यथा, मनुः ।२।२४७ ।

"आचार्य्ये तु खलु प्रेते गुरुपुत्त्रे गुणान्विते ।
गुरुदारे सपिण्डे वा गुरुवत् वृत्तिमाचरेत् ॥")

वैदिकविधानेन और्द्ध्वदेहिकाभावात् विष्णुद्देशाच्च बहुनरकभोगान्ते प्रेतशरीरं भवति । यथा,—

लोमश उवाच ।

"ततो बहुतिथे काले स राजा पञ्चतां गतः ।
वैदिकेन विधानेन न लेभे चौर्द्ध्वदेहिकम् ॥
विष्णुप्रवेशमात्रेण युगानां सप्तविंशतिम् ।
भुक्त्वा च यातनां याम्यीं निस्तीर्णनरको नृपः ॥
समया गिरिराजन्तु पिशाचोऽभूत्तदा
महान् ॥"

तस्य रूपं यथा,—

"देवद्युतिरधीयानः शुश्राव करुणामयः ।
समागत्य ततस्तत्र तं पिशाचं ददर्श सः ॥
विकरालमुखं दीनं पिशङ्गनयनं भृशम् ।
ऊर्द्ध्वकेशं जलघ्राङ्गं यमदूतमिवापरम् ॥
चलज्जिह्वञ्च लम्बोष्ठं दीर्घजङ्घशिराकुलम् ।
दीर्घाङ्घ्रिं शुष्कतुण्डञ्च गर्त्ताक्षं शुष्कपञ्जरम् ॥"
इति पाद्मोत्तरखण्डे १९ अध्यायः ॥*॥